"आनीता भवता यदा पतिरता साध्वी धरित्रीसुता"
नाटकम् । [प्रियानीतिं रामोरक्षोबधे स्थितः" मुग्ध० ।
**आनीति** स्त्री आ+नी–क्तिन् । आनयने "चङ्क्रमित्वा
**आनील** पु० ईषदर्थे आङ् प्रा०स० । १ईषन्नीलवर्णे २तद्वति
त्रि० । ३नीलघोटके पु० हेम० । ४तज्जातिस्त्रियां स्त्री ङीप्
**आनु** त्रि० अन–उण् । प्राणिनि आनवशब्दे उदा० ।
**आनुकल्पिक** त्रि० अनुकल्पं वेत्ति तद्बोधकग्रन्थमधीते वा
उक्था० ठक् १अनुकल्पाभिज्ञे २तद्बोधकग्रन्थाध्येतरि च
अनुकल्पेन प्राप्तः ठक् । ३अनुकल्पेन प्राप्ते । अनुकल्पाय
हितम् ठक् । ४अनुकल्पसाधने । [वर्त्तमाने ।
**आनुकूलिक** त्रि० अनुकूलं वर्त्तते ठक् । आनुकूल्येन
**आनुकूल्य** न० अनुकूलस्य भावः कर्म्म वा ष्यञ् । अनुकूलता-
चरणे १साहाय्ये २अनुगुणतायाञ्च । "यत्रानुकूल्यं दम्पत्यो
स्त्रिवर्गस्तत्र वर्द्धते" या० स्मृ० "रमतश्चानुकूल्येन ययुः
संवत्सरा दश" रामा० । [ पश्चाद्भवादौ ।
**आनुगङ्ग्य** त्रि० अनुगङ्गं भवः परिमुखा० ञ्य । गङ्गा-
**आनुगतिक** त्रि० अनुगतमनुगमनं भावे क्त तेन निर्वृत्तः
अक्षद्यूता० ठक् । अनुगमेन निर्वृत्ते सन्तोषादौ ।
**आनुगत्य** न० अनुगतस्य भावः कर्म्म वा ष्यञ् । १अनुगमन
रूपाचरणे २अनुगतत्वे च । [स्वार्थे ठक् । पश्चात्कथके ।
**आनुगादिक** त्रि० अनुगदतीति अनुगादी स एव अनुगादिन्+
**आनुगुणिक** त्रि० अनुगुणमधीते वेद वा वसन्ता० ठक् ।
१अनुगुणाभिज्ञे २तद्बोधकग्रन्थाध्येतरि च । स्त्रियां ङीप् ।
**आनुगुण्य** न० अनुगुणस्य भावः कर्म्म वा ष्यञ् । १अनुकूल-
ताचरणे २अनुकूलत्वे च । [ स्त्रियां ङीप् ।
**आनुग्रामिक** त्रि० अनुग्रामं भवः ठञ् । ग्रामपश्चाद्भवादौ
**आनुचारक** न० अनुचारकस्य धर्म्म्यं महिष्यादि० अण् ।
अनुचरधर्म्म्ये आचरणे ।
**आनुति** पुंस्त्री० आनुतस्यापत्यम् इञ् । आनुतनाम्नोयुने-
रपत्ये । "इञः प्राचाम्" ततः युवप्रत्ययस्य लुक् तु तौल्व-
ल्यादित्वात् न । आनुतिः पिता आनुतायनः पुत्रः ।
आ+नु–क्तिन् । सम्यक्स्तवने स्त्री । [पश्चाद्भवादौ ।
**आनुतिल्य** त्रि० अनुतिलं भवः परिमुखा० ञ्य । तिलस्य
**आनुदृष्टिनेय** पुंस्त्री अनुदृष्टौभवः शुभ्रा० ढक् कल्या० आनङ्
च । अनुदृष्टिभवे । [ ध्वंसपश्चाद्भवे स्त्रियां ङीप् ।
**आनुनाश्य** त्रि० अनुनाशं विनाशस्य पश्चाद् भवः संका० ण्य ।
**आनुनासिक्य** न० आनुनासिकस्य भावः ष्यञ् । अनुना-
सिकधर्म्मे नासासहिततत्तत्स्थानोच्चार्य्यत्वे 'प्रतिज्ञानु-
नासिक्याः पाणिनीयाः" व्याकरणीया परिभाषा ।
**आनुपथ्य** त्रि० अनुपथं भवः परिमु० ञ्य । मार्गस्य पश्चाद्भवादौ
**आनुपदिक** त्रि० अनुपदं धावति ठक् । अनुपदं १धावमाने
पदस्य वेदपाठविशेषस्य पश्चात् अनुपदं तद्वेत्ति तद्बोध-
कग्रन्थं वाऽधीते उक्था० ठक् । २पदग्रन्थाध्येतरि
३तदभिज्ञे च स्त्रियां ङीप् । [ पश्चाद्भवादौ ।
**आनुपद्य** त्रि० अनुपदं भवः परिमुखा० ञ्य । पदस्य
**आनुपूर्व्वी** स्त्री पूर्व्वमनुक्रम्य अनुपूर्व्वं तस्य भावः ष्यञ् ततो
वा ङीषि यलोपः । परिपाट्याम् मूलावधिके क्रमे
"षड़ानुपूर्व्या विप्रस्य क्षत्रस्य चतुरोऽवरान्" मनुः ।
ङीषभावपक्षे आनुपूर्व्यमप्यत्र न० । "वसीरन्नानुपूर्व्येण
शाणक्षौमाविकानि च" मनुः ।
**आनुमानिक** त्रि० अनुमानादागतः ठक् स्त्रियां ङीप् । अनुमा-
नप्राप्ते १युक्तिसिद्धे २व्याप्तिविशिष्टलिङ्गज्ञानादवगते अनुमिते
पदार्थे यथा धूमदर्शनात् वह्निरनुमीयते स च वह्निः
स्वव्याप्तिविशिष्टधूमज्ञानेनैवावगत इति तस्य तथात्वम् ।
अनुमानमात्रेणावगम्ये वेदे वाचकशब्दशून्ये सांख्यमत-
सिद्धे ३प्रधाने न० । "ईक्षतेर्नाशब्दमिति" शा० सूत्र
भाष्ये तस्य च वेदशब्दप्रतिपाद्यत्वं निराकृत्य "रचनानु-
पपत्तेर्नानुमानम्" सू० भा० अनुमानगम्यत्वमपि निरा-
कृतम् । तस्य च यथानुमानिकत्वं तथा ४६६,६७ पृष्ठे
अव्यक्तशब्दे दर्शितम् "आनुमानिकमप्येकेषामिति चेन्न
शरीररूपकविन्यस्तगृहीतेर्दर्शयति च" शा० सू० ।
**आनुमाष्य** त्रि० अनुमाषं भवः परिमुखा० ञ्य । माषस्य
पश्चाद्भवादौ । [ द्भवादौ ।
**आनुयव्य** त्रि० अनुयवं भवः परिमुखा० ञ्य । यवस्य पश्चा-
**आनुयूप्य** त्रि० अनुयूपं भवः परिमुखा० ञ्य । यूपस्य पश्चा-
द्भवादौ । [२आनुगत्ये च ।
**आनुरक्ति** स्त्री आ+अनु+रन्ज–क्तिन् । १अनुरागे
**आनुराहति** पुंस्त्री० अनुरहतोऽपत्यम् बाह्वा० इञ्
अनुश० द्विपदवृद्धिः । मुनिभेदे युवापत्ये तु ततः फक्
तौल्वल्या० न लुक् । आनुराहतायनः । तस्य युवापत्ये ।
आनुहारति इति पाठान्तरम् ।
**आनुरोहति** पुंस्त्री० अनुरोहतोपत्यम् बाह्वा० इञ् । अनु-
रोहन्मुनेर्गोत्रापत्ये तस्य युवापत्ये फक् तस्य तौ० न लुक् ।
आनुरोहतायनः तदीययुवापत्ये ।
**आनुलेपिक** त्रि० आनुलेपिकायाः स्त्रिया धर्म्म्यम् महिष्या०
अण् । अनुलेपिकाया धर्म्ये कर्म्मणि ।